# १. द्वे विद्ये वेदितव्ये ।

**I एकवाक्येन संस्कृतभाषया उत्तराणि लिखत ।**

1. देवानां प्रथमः कः? (K)
2. भुवनस्य गोप्ता कः ? (K)
3. ब्रह्मणः ज्येष्ठपुत्रः कः? (K)
4. अङ्गीः कस्मै ब्रह्मविद्यां प्रोक्तवान् ? (K)
5. महाशालः कः ? (K)
6. द्वे विद्ये के ? (K)
7. वेदाङ्गानि कति ? (K)
8. कया विद्यया अक्षरम् अधिगम्यते ? (K)
9. अग्राह्यं किम्? (K)
10. विश्वं कस्मात् सम्भवति ? (K)

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. ब्रह्मविद्यायाः परम्परां लिखत । (K)
2. अपरायां विद्यायां के अन्तर्भवन्ति ? (K)
3. ब्रह्मणः स्वरूपं वर्णयत । (K)
4. विश्वस्य उत्पत्तिः कथमिति सोदाहरणं लिखत । (K)

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. सर्वमिदं विज्ञातं भवतीति । (C)
2. परा चैवापरा च । (C)
3. यद्भूतयोनिं परिपश्यन्ति धीराः ।(C)
4. कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । (C)
5. यथोर्णनाभिः सृजते । (C)

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. ब्रह्मा देवानां................सम्बभूव । (S)
2. सर्वविद्याप्रतिष्ठाम्............ज्येष्ठपुत्राय प्राह । (S)
3. शौनको ह वै महाशालोऽङ्गिरसं..........उपसन्नः पप्रच्छ । (S)
4. यथा पृथिव्याम्..............सम्भवन्ति । (S)
5. ............... यया तदक्षरम् अधिगम्यते ।(S)
6. यथा ............... सृजते गृण्हते च ।(S)

( परा, अथर्वाय, प्रथमः, विधिवत्, ऊर्णनाभिः, ओषधयः )

**V संयोजयत** (S)

| अ | आ |
|---|---|
| अथर्वा | केशलोमानि |
| पुरुषात् | सुसूक्ष्मम् |
| सत्यवहः | ज्येष्ठपुत्रः |
| अक्षरम् | अपरा |
| शिक्षा | भारद्वाजः |

**************

## २. आदर्शगुणाः ।

I **एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. रामः कस्मिन् वंशे जातः? (K)
2. शत्रुनिबर्हणः कः ? (K)
3. त्यागे रामः केन समः? (K)
4. रामः कान् स्वजनवत् पश्यति? (K)
5. रामः कान् अविजित्य सङ्ग्रामात् न निवर्तते ? (K)
6. वासवः केषां राजा? (K)
7. रामः केषु विशारदः आसीत् ? (K)
8. रामः केन सह सङ्ग्रामं व्रजति ? (K)

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. श्रीरामस्य गुणान् सङ्गृह्य लिखत । (A)

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. धर्मज्ञः सत्यसन्धश्च ........ च हिते रतः । (S)
2. सङ्ग्रामात् पुनरागत्य कुञ्जरेण...........वा । (S)
3. रामो विग्रहवान् ..............। (S)
4. ............. स्वस्य धर्मस्य। (S)
5. रामो ............. शौर्यवीर्यपराक्रमैः। (S)

( रथेन, धर्मः, प्रजानाम् लोकाभिरामोऽयम्, रक्षिता )

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टश्लोकानाम् अनुवादं कन्नड -आङ्ग्लभाषया वा कुरुत ।**

1. धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
   यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् । (C)

2. रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। (C)

3. सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिवान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। (C)

4. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ।। (C)

5. मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।
प्रियवादी च भूतानां सत्यवादी च राघवः ।। (C)

6. स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः ।
सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः ।। (C)

7. रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानामिव वासवः ।। (C)

**V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. रामः <u>धनुर्वेदे</u> निष्ठितः । (S)
2. रामः <u>प्रजानां</u> हिते रतः । (S)

*****************

## ३. विवादः विनाशाय ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. कपिञ्जलः कुत्र वसति स्म ? (K)
2. चटकस्य नाम किम् ? (K)
3. कपिञ्जलः किमर्थम् अन्यं देशं गतः? (K)
4. शीघ्रगः कः ? (K)
5. शश-कपिञ्जलयोः विवादनिर्णायकः कः ? (K)
6. कपिञ्जलः अन्यैः चटकैः सह कुत्र गतः ? (K)
7. कः कपिञ्जलस्य कोटरे प्रविष्टः ? (K)
8. मूर्खाः कस्य परमार्थं न जानन्ति ? (K)
9. क्षणभङ्गुराः के ? (K)
10. अनित्यानि कानि ? (K)

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. वायसः सोद्वेगं किम् अचिन्तयत् ? (K)
2. वायस- कपिञ्जलयोः कालः कथं गच्छति स्म? (K)
3. शश-कपिञ्जलयोः वासस्थानविषयकः कलहः कः ? (K)

4. धर्मोपदेशं श्रुत्वा कपिञ्जलः शशकं किमाह । (K)

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. मार्जारस्य धर्मोपदेशः । (A)
2. मार्जारः शशकपिञ्जलौ कथं व्यापादयति ? (A)
3. 'विवादः विनाशाय' इति पाठस्य शीर्षिकां समर्थयत । (A)

**IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. किं केनापि पाशेन बद्धः ? (C)
2. तच्छीघ्रं निष्क्रम्यताम् । (C)
3. मया द्रष्टव्योऽयं न्यायः । (C)
4. अहिंसैव धर्ममार्गः । (C)
5. ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति । (C)
6. यो हीनवादी स ते भक्ष्यः । (C)
7. तन्नाहं भक्षयिष्यामि । (C)

**V मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. केनापि ............बद्धः ? (S)
2. परोपकारः पुण्याय............परपीडनम् । (S)
3. श्रुतेः परमार्थं.............न जानन्ति । (S)
4. ............ अहानि अतिक्रान्तानि । (S)
5. असारोऽयं ............ । (S)

( बहूनि, मूर्खाः, संसारः, पाशेन, पापाय )

**VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. <u>आवयोः</u> विवादः वर्तते। (S)
2. नरकपातकमार्गात् निवृत्तो <u>मार्जारः</u> । (S)
3. <u>नदीतीरे</u> धर्मवादी तिष्ठति । (S)
4. <u>अजाव्रीहयः</u> सप्तवार्षिकाः कथ्यन्ते । (S)
5. <u>स्वप्नसदृशः</u> प्रियसमागमः । (S)

************************